# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा, एप्रिल-२०१६

कक्षा - शास्त्री-१ ( Sem_2 )    प्रश्नपत्र-८    गुणाः - ७०

विषयः - पौरोहित्यम्    CE 1.2.4    समयः - ११:०० तः ०२:००

दिनाङ्कः - २६-०४-२०१६    सन्दर्भग्रन्थः - कुण्डमण्डपसिद्धिः

---

### युनिट-१

**प्रश्नः -१  निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या विधेया ।** ०८

*(१) यवोयूका च लीक्षा च बालाग्रश्चैवमादयः ।*
*कृतमृष्टिकरोरत्नि ररत्निरकनिष्ठिकः ॥*

*(२) दिनमानदलेसक्तां गृहच्छायाग्रतो हि यत् ।*
*शङ्कुमूले नीयमानं सूत्रंस्यादुत्तरा दिशा ॥*

*(३) तुलाप्रदानेऽधममध्ययोः स्यात्सापञ्चहस्तोत्तमकेऽद्रिहस्ता ।*
*ईशानभागे ग्रहवेदिका तु हस्तोन्मितोच्छ्रायवती त्रिवप्रा ॥*

**प्रश्नः -२  एकस्य वर्णनं लिखत ।** ०८

*(१) मध्यवेदीमानं कृत्वा ग्रहवेदीमानं वर्णयतु ।*

*(२) वलिकानिवेशनं कृत्वा तोरणकाष्ठव्यवस्थायाः वर्णनं कुरुत ।*

**प्रश्नः -३  द्वयोः टिप्पणी कार्या ।** ०४

*(१) मङ्गलाचरणम् ।*    *(२) हस्तादि परिभाषा ।*

*(३) ध्वजनिर्माणम् ।*    *(३) दक्षिणोत्तरसाधनम् ।*

**प्रश्नः -४  केषाञ्चित पञ्चानां लघूत्तराणि लिखन्तु ।** ०५

*(१) मङ्गलाचरणे कस्य देवस्य स्तुतिः विद्यते ?*

*(२) कृष्णात्रिगोत्रे कस्य जन्मविषये उल्लेखः अस्ति ?*

*(३) 'एकहस्तमानम्' स्पष्टयतु ।*

*(४) यवस्य कति भागाः युकार्थम् स्पष्टयतु ।*

*(५) 'धरित्रीम्' इत्यस्य कोऽर्थः ?*

*(६) दिक् साधनं कथं कदा कर्तव्यम् ?*

*(७) शङ्कोः लक्षणं किम् ?*

### युनिट-२

**प्रश्नः -५  निम्नाङ्कितेषु कयोश्चित् द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।** ०८

*(१) प्राच्याः चतुष्कोणभगेन्दुखण्ड त्रिकोणवृत्ताऽङ्ग भुजाम्बुजानि ।*
*अष्टास्त्रि शक्रेश्वरयोस्तु मध्ये वेदास्त्रि वा वृत्तमुशन्ति कुण्डम् ॥*

*(२) लक्षैकवृद्ध्यादशलक्षकान्तं करैकवृद्ध्यादशहस्तकं च ।*
*कोटयर्धदिग्विंशतिलक्षलक्ष दलेमुनीष्वर्तुकृशानुभिश्च ॥*

*(३) क्षेत्रे जिनांशेगजचन्द्रभागैः स्वाष्टाक्षिभागेन युतैस्तुवृत्ते ।*
*विदिग्दिशोरन्तरतोऽष्ट सूत्रै तृतीययुक्तैरिदमष्टकोणम् ॥*

**प्रश्नः -६** **एकस्य समीक्षाा कार्या ।** **०८**

*(१) नवकुण्ड वा पञ्चकुण्डनिवेशनम् ।* *(२) स्थण्डिलविवेचनम् ।*

**प्रश्नः -७** **कयोश्चिद् द्वयोः टिप्पणी कार्या ।** **०४**

*(१) एककुण्डनिवेशनम् । (२) क्षेत्रमानम् । (३) योनिनिवेशनम् । (४) कुण्डफलम् ।*

**प्रश्नः -८** **केषाञ्चित पञ्चानां लघूत्तराणि लिखन्तु ।** **०५**

*(१) यज्ञो वै विष्णुः अर्थं लिखतु ।*
*(२) देहिमेददामि ते निमेधेहिनितेदधौ . . . । कस्यां संहितायां दत्तमस्ति ?*
*(३) सहयज्ञाः प्रजाः सृष्ट्वा . . . . ॥ केनोक्तम् कुत्र च ?*
*(४) मखानां कति प्रकाराः ?*
*(५) चतुष्कोणनामानि कानि ?*
*(६) ''वृत्तम्'' शब्दस्य अर्थं लिखतु ।*
*(७) 'सर्वसिद्धिकरं कुण्डं . . . . उदाहृतम्' इत्यस्य रिक्तस्थानं पूरयतु ।*

**युनिट-३**

**प्रश्नः -९** **कयोश्चित् द्वयोः ससन्दर्भ व्याख्या कार्या ।** **०८**

*(१) अथार्कागुलपक्षे तु मेखलानां दशांगुलैः ।*
*विस्तृतातिथिभिर्दीर्घा गुलिभिर्योनिरिष्यते ॥*
*(२) आयुरारोग्यमैश्वर्यं लभते समबाहुके ।*
*सूक्ष्मक्षेत्रफले कुण्डे तद्ध्रासो विषमे भुजे ॥*
*(३) अष्टघ्नान्फलवर्गाच्च पञ्चभक्तात्पदात्पदम् ।*
*अभीष्टे वर्तुले कुण्डे व्यासमानं प्रजायते ॥*

**प्रश्नः -१०** **एकस्मिन् विषये विस्तरेण वर्णनं कुरुत ।** **०८**

*(१) ''मण्डपकुण्डसिद्धिः'' इति विषये ग्रन्थानुसारं वर्णयत ।*
*(२) तृतीयोऽध्यायस्य विषयवस्तु प्रस्तूयताम् ।*

**प्रश्नः -११** **एका टिप्पणी कार्या ।** **०२**

*(१) नाभिलक्षणं विलिख्य कुण्डस्य योनिलक्षणं ग्रन्थानुसारं लिखतु ।*
*(२) नवकुण्डीचक्रं विलिख्य पञ्चकुण्डीचक्रं आलेखयतु ।*

**प्रश्नः -१२** **अधोलिखितेषु द्वयोः उत्तरं लिखत ।** **०२**

*(१) यावत्कुण्डस्य . . . . . खननम् ॥ इत्यस्य पूर्तिं कुरुत ।*
*(२) ब्राह्मणयजमानस्य कुण्डे कति मेखला भवन्ति ?*
*(३) कुण्डानां यादृशं रूपं मेखलानाञ्च तादृशम् – अर्थं लिखतु ।*
*(४) त्रिषु मेखलासु के देवाः स्पष्टयतु ।*

---------------------